## Āyuṣhya Sūktam

[As per tradition]

ॐ यो ब्रम्हा ब्रम्हण , उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवः स न , आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ १ ॥

ॐ yōb’ bram’hāb’ bram’haṇa , uj’jahārap’ prāṇaiśh’
    śhira[hk]’ kṛt’tivāsāā[fp]’ pinākī ।
īśhānō dēvas’ sa na , āyur’dadhātu tas’mai
    juhōmi haviṣhā ghṛtēna ॥ 1 ॥

विभ्राजमानः सरिरस्य मध्या-द्रोचमानो घर्मरुचिर्य , आगात् ।
स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः ॥ २ ॥

vibh’rājamānas’ sariras’ya madh’yād’ drōchamānō
    ghar’maruchir’ya , āgā-te ।
sa mṛt’yupāśhānapanud’ya ghōrānihāyuṣhēṇō
    ghṛtamat’tu dēvaḥa ॥ 2 ॥

ब्रम्हज्योति-र्ब्रम्ह-पत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम् ।
सुवर्णरम्भग्रह मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ ३ ॥

bram’haj’yōtir’ bram’ha pat’nīṣhu gar’bhañ’
    yamādadhāt’ pururūpañ’ jayan’tam ।
suvar’ṇaram’bhag’raha mar’kamar’chyan’ tamāyuṣhē
    var’dhayāmō ghṛtēna ॥ 3 ॥

www.SaiVeda.net

श्रियं लक्ष्मी मौबला मम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रम्हयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेन ॥ ४ ॥

śhriyaṁ' lak'ṣhmī maubalā mam'bikāṅ' gāṇ'
ṣhaṣh'ṭhīñ' cha yāmin'drasēnēet'yudāhuḥu ।
tāṁ' vid'yām' bram'hayōnigm' sarūpāmihāyuṣhē
tar'payāmō ghṛtēna ॥ 4 ॥

दाक्षायण्यः सर्वयोन्यः स योन्यः सहस्रशो विश्वरूपा विरूपाः ।
ससूनवः सपतयः सयूथ्या , आयुषेणो घृतमिदं जुषन्ताम् ॥५॥

dāk'ṣhāyaṇ'yas' sar'vayōn'yas' sa yōn'yas' sahas'raśhō
viśh'varūpā virūpā-ḥa ।
sasūnavas' sapatayas' sayūth'yā , āyuṣhēṇō
ghṛtamidañ' juṣhan'tām ॥ 5 ॥

दिव्या गणा बहुरूपाः पुराणा , आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥६॥

div'yā gaṇā bahurūpāā[fp]' purāṇā , āyuśh'chhidō
na[fp]' pramath'nan'tu vīrā-ne ।
tēbh'yō juhōmi bahudhā ghṛtēna mā na[fp]' prajāgm'
rīriṣhō mōta vīrā-ne ॥ 6 ॥

www.sai-veda.net

एकः पुरस्तात् य , इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनꣳ साँम्पराये स नो हविर्घृत-मिहायुषेत्तु देवः ॥७॥

ēka[fp]’ puras’tāt’ ya , idam’ babhūva yatō babhūva
bhuvanas’ya gōpā-ḥa ।
yamap’yēti bhuvanagm’ sāām’parāyē sa nō havir’ghṛta
mihāyuṣhēēt’tu dēvaḥa ॥ 7 ॥

वसून् रुद्रा-नादित्यान् मरुतोऽथ साध्यान् ,
ऋभून् यक्षान् गन्धर्वाꣳश्च पितृꣳश्च विश्वान् ।
भृगून् सर्पाꣳश्चाङ्गिरसोऽथ सर्वान् घृतꣳ
हुत्वा स्वायुष्या महयाम शश्वत् ॥ ८ ॥

vasūn’ rud’rā nādit’yān’ marutō (a)tha sādh’yān ,
ṛbhūn’ yak’ṣhān’ gan’dhar’vāgeśh’cha
pitṛgeśh’cha viśh’vā-ne ।
bhṛgūn’ sar’pāgeśh’chāṅ’girasō (a)tha sar’vān’ ghṛtagm’
hut’vās’ svāyuṣh’yā mahayāma śhaśh’vate ॥ 8 ॥

विष्णो त्वं नो , अन्तमश्शर्मयच्छ सहन्त्य ।
प्रतेधारा मधुश्चुत , उथ्सं दुह्रते , अक्षितम् ॥ ९ ॥
viṣh’ṇōt’ tvan’ nō ,
an’tamaśh’śhar’mayat’chha sahan’tya ।
pratēdhārā madhuśh’chuta ,
uth’san’ duh’ratē , ak’ṣhitam ॥ 9 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥